# Brihaspatikritam Agni Stotram

# बृहस्पतिकृतं अग्निस्तोत्रम्

## Document Information

Text title : Brihaspatikritam Agni Stotram

File name : bRRihaspatikRRitaMagnistotram.itx

Category : deities_misc, mahAbhArata, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | udyogaparva | adhyAya 16/1-8||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# बृहस्पतिकृतं अग्निस्तोत्रम्

बृहस्पतिरुवाच ।
त्वमग्ने सर्वदेवानां मुखं त्वमसि हव्यवाट् ।
त्वमन्तः सर्वभूतानां गूढश्चरसि साक्षिवत् ॥ १॥

त्वामाहुरेकं कवयस्त्वामाहुस्त्रिविधं पुनः ।
त्वया त्यक्तं जगच्चेदं सद्यो नश्येद्धुताशन ॥ २॥

कृत्वा तुभ्यं नमो विप्राः स्वकर्मविजितां गतिम् ।
गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ॥ ३॥

त्वमेवाग्ने हव्यवाहस्त्वमेव परमं हविः ।
यजन्ति सत्रैस्त्वामेव यज्ञैश्च परमाध्वरे ॥ ४॥

सृष्ट्वा लोकांस्त्रीनिमान्हव्यवाह प्राप्ते काले पचसि पुनः समिद्धः ।
सर्वस्यास्य भुवनस्य प्रसूतिस्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ॥ ५॥

त्वामग्ने जलदानाहुर्विद्युतश्च त्वमेव हि ।
दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हायनाः ॥ ६॥

त्वय्यापो निहिताः सर्वास्त्वयि सर्वमिदं जगत् ।
न तेऽस्त्यविदितं किञ्चित्त्रिषु लोकेषु पावक ॥ ७॥

स्वयोनिं भजते सर्वो विशस्वापोऽविशङ्कितः ।
अहं त्वां वर्धयिष्यामि ब्राह्मैर्मन्त्रैः सनातनैः ॥ ८॥

इति महाभारते उद्योगपर्वणि १६ अध्यायान्तर्गतं
बृहस्पतिकृतं अग्निस्तोत्रं सम्पूर्णम् ।

महाभारत । उद्योगपर्व । अध्याय १६/१-८॥

mahAbhArata . udyogaparva . adhyAya 16/1-8..

Proofread by PSA Easwaran

*Brihaspatikritam Agni Stotram*
pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*